श्री विष्णु स्तवराजः

श्री विष्णु स्तवराजः

पद्मोवाच |
योगेन सिद्धविबुधैः परिभाव्यमानं
लक्ष्म्यालयं तुलसिकाचितभक्तभृंगं |
प्रोत्तुंगरक्तनखरांगुळिपत्रचित्रं
गंगारसं हरिपदांबुजमाश्रयेऽहं || 1 ||

गुंफन्मणिप्रचयघट्टितराजहंस-
-सिंजत्सुनूपुरयुतं पदपद्मवृंदं |
पीतांबरांचलविलोलचलत्पताकं
स्वर्णत्रिवक्रवलयं च हरेः स्मरामि || 2 ||

जंघे सुपर्णगळनीलमणिप्रवृद्धे
शोभास्पदारुणमणिद्युतिचुंचुमध्ये |
आरक्तपादतललंबनशोभमाने
लोकेक्षणोत्सवकरे च हरेः स्मरामि || 3 ||

ते जानुनी मखपतेर्भुजमूलसंग-
-रंगोत्सवावृततटिद्वसने विचित्रे |
चंचत्पतत्रिमुखनिर्गतसामगीत-
-विस्तारितात्मयशसी च हरेः स्मरामि || 4 ||

विष्णोः कटिं विधिकृतांतमनोजभूमिं
जीवांडकोशगणसंगदुकूलमध्यां |
नानागुणप्रकृतिपीतविचित्रवस्त्रां
ध्याये निबद्धवसनां खगपृष्ठसंस्थां || 5 ||

शातोदरं भगवतस्त्रिवळिप्रकाश-
-मावर्तनाभिविकसद्विधिजन्मपद्मं |
नाडीनदीगणरसोत्थसितांत्रसिंधुं
ध्यायेऽंडकोशनिलयं तनुलोमरेखं || 6 ||

वक्षः पयोधितनयाकुचकुंकुमेन
हारेण कौस्तुभमणिप्रभया विभातं |
श्रीवत्सलक्ष्म हरिचंदनजप्रसून-
-मालोचितं भगवतः सुभगं स्मरामि || 7 ||

बाहू सुवेषसदनौ वलयांगदादि-
-शोभास्पदौ दुरितदैत्यविनाशदक्षौ |
तौ दक्षिणौ भगवतश्च गदासुनाभ-
-तेजोर्जितौ सुललितौ मनसा स्मरामि || 8 ||

वामौ भुजौ मुररिपोर्धृतपद्मशंखौ
श्यामौ करींद्रकरवन्मणिभूषणाढ्यौ |
रक्तांगुळिप्रचयचुंबितजानुमध्यौ
पद्मालयाप्रियकरौ रुचिरौ स्मरामि || 9 ||

कंठं मृणाळममलं मुखपंकजस्य
लेखात्रयेण वनमालिकया निवीतं |
किं वा विमुक्तिवशमंत्रकसत्फलस्य
वृंतं चिरं भगवतः सुभगं स्मरामि || 10 ||

वक्त्रांबुजं दशनहासविकासरम्यं
रक्ताधरोष्ठवरकोमलवाक्सुधाढ्यं |
सन्मानसोद्भवचलेक्षणपत्रचित्रं
लोकाभिराममममलं च हरेः स्मरामि || 11 ||

सूरात्मजावसथगंधमिदं सुनासं
भ्रूपल्लवं स्थितिलयोदयकर्मदक्षं |
कामोत्सवं च कमलाहृदयप्रकाशं
संचिंतयामि हरिवक्त्रविलासदक्षं || 12 ||

कर्णौ लसन्मकरकुंडलगंडलोलौ
नानादिशां च नभसश्च विकासगेहं |
लोलालकप्रचयचुंबनकुंचिताग्रौ
लग्नौ हरेर्मणिकिरीटतटे स्मरामि || 13 ||

भालं विचित्रतिलकं प्रियचारुगंधं
गोरोचनारचनया ललनाक्षिसख्यं |
ब्रह्मैकधाममणिकांतकिरीटजुष्टं
ध्याये मनोनयनहारकमीश्वरस्य || 14 ||

श्रीवासुदेवचिकुरं कुटिलं निबद्धं
नानासुगंधिकुसुमैः स्वजनादरेण |
दीर्घं रमाहृदयगाशमनं धुनंतं
ध्यायेऽंबुवाहरुचिरं हृदयाब्जमध्ये || 15 ||

मेघाकारं सोमसूर्यप्रकाशं
सुभ्रून्नासं शक्रचापैकमानं |
लोकातीतं पुंडरीकायताक्षं
विद्युच्चैलं चाश्रयेऽहं त्वपूर्वं || 16 ||

दीनं हीनं सेवया दैवगत्या
पापैस्तापैः पूरितं मे शरीरं |
लोभाक्रांतं शोकमोहादिविद्धं
कृपादृष्ट्या पाहि मां वासुदेव || 17 ||

ये भक्त्याऽद्यां ध्यायमानां मनोज्ञां
व्यक्तिं विष्णोः षोडशश्लोकपुष्पैः |
स्तुत्वा नत्वा पूजयित्वा विधिज्ञाः
शुद्धा मुक्ता ब्रह्मसौख्यं प्रयांति || 18 ||

पद्मेरितमिदं पुण्यं शिवेन परिभाषितं |
धन्यं यशस्यमायुष्यं स्वर्ग्यं स्वस्त्ययनं परं || 19 ||

पठंति ये महाभागास्ते मुच्यंतेऽहसोऽखिलात् |
धर्मार्थकाममोक्षाणां परत्रेह फलप्रदं || 20 ||

इति श्रीकल्किपुराणे पद्मकृत श्री विष्णु स्तवराजः ||